# कश्चन विलक्षणप्रतिभावान् युवा आर्यभटो नाम

**डॉ. मु.वि.मोहनः**
**वरिष्ठानुसन्धाता**
**संस्कृतसंवर्धनप्रतिष्ठानम्**

व्याख्याकर्ता मल्लिनाथ-सूरिः यथा महाकवि-कालिदासेन सह सम्बद्धः अस्ति, तद्वत् भास्कराचार्यः (प्रथमः) आर्यभटेन सह सम्बद्धः भवति । अर्थात् आर्यभटेन उक्तानां विषयाणां समुचितं विवरणं भास्कराचार्येण (प्रथमेन) कृतम् आसीत् । ऋते भास्कराचार्यस्य कृतेः, आर्यभटेन उक्ताः केचन विषयाः दुर्बोधाः एव तिष्ठेयुः । अस्य भास्कराचार्यस्य वचसा आर्यभटस्य विषये एवं कथ्यते -

**नालमार्यभटादन्ये ज्योतिषां गतिवित्तये ।**
**तत्र भ्रमन्ति तेऽज्ञानबहुलध्वान्तसागरे ॥** *लघुभास्करीयम् १.३*

अर्थात्, 'आर्यभटं विहाय नान्यः कोऽपि ज्योतिषाम् अयनं ज्ञातुं शक्तः, अन्ये केवलम् अज्ञानान्धकारमये सागरे चरन्ति' इति ।

## भूमिका

१९ एप्रैल् १९७५ दिनाङ्के भारतेन अन्तरिक्षं प्रति प्रथमः उपग्रहः निक्षिप्तः आसीत् । **भारत-अन्तरिक्ष-अनुसन्धान-संघटनस्य** (**ISRO**) वैज्ञानिकानां षड्विंशतेः मासानां कठोरपरिश्रमेण एषा उपलब्धिः प्राप्ता आसीत् । अस्य उपग्रहस्य नाम "**आर्यभट**" इति कृतम् आसीत् ।

५ एप्रैल् २०१६ दिनाङ्के तत्कालीनः मानवसंसाधनविकासस्य (**HRD**) मन्त्री सु.श्रीः स्मृतिईरानी विदेशे आर्यभटस्य प्रतिमायाः अनावरणं कृतवती । तत् स्थानं सुप्रसिद्धस्य **संयुक्तराष्ट्र-शैक्षिक-वैज्ञानिक-सांस्कृतिक-संघटनस्य** (**UNESCO**) मुख्यालयः, पेरिस-नगरम् आसीत् । भारतस्य गौरवपूर्णक्षणम् आसीत् तत् यतः प्रसिद्धस्य भारतीय-खगोलशास्त्रज्ञस्य आर्यभटस्य कांस्यमय-प्रतिमायाः अनावरणं फ्रान्सदेशे कृतम् आसीत् । तदैव 'शून्यविषये अन्ताराष्ट्रीयसम्मेलनम्' अपि आयोजितम् आसीत् ।

आर्यभटस्य किं वा तत् वैशिष्ट्यम् आसीत् ?

वस्तुतः आर्यभटः इति नाम अत्यन्तं प्रसिद्धं वर्तते । आर्यभटस्य ख्यातिः विदेशेषु अपि प्रसृता अस्ति । विद्यालयेषु बालाः अपि आर्यभटः इति नाम निश्चयेन श्रुतवन्तः एव । परन्तु अस्य महापुरुषस्य जीवनस्य विषये, अस्य जीवनकालस्य विषये, अस्य कृतीनां विषये च न तथा बहुभिः ज्ञातम् अस्ति । अत्र वयम् एतान् विषयान् अवगन्तुं प्रयत्नं कुर्मः ।

## पुण्यश्लोकी आर्यभटः

एकात्मतास्तोत्रम् इति बहुभिः नित्यं पठ्यते । तत्र श्लोकद्वयेन प्रसिद्धानां द्वादशानां भारतीय-वैज्ञानिकानां नामानि उल्लिखितानि सन्ति, येषु आर्यभटः अन्यतमः विद्यते – कपिलः, कणादः, सुश्रुतः, चरकः, भास्कराचार्यः, वराहमिहिरः, नागार्जुनः, भरद्वाजः, आर्यभटः, जगदीशचन्द्र-वसुः, चन्द्रशेखर-वेङ्कटरामः श्रीनिवास-रामानुजः च ।

**वैज्ञानिकाश्च कपिलः कणादः सुश्रुतस्तथा ।**
**चरको भास्कराचार्यो वराहमिहिरः सुधीः॥**
**नागार्जुनो भरद्वाजः *आर्यभटो* वसुर्बुधः।**
**ध्येयो वेङ्कटरामश्च विज्ञा रामानुजादयः॥** *(एकात्मतास्तोत्रम्)*

**कोऽयम् आर्यभटः ?**

आर्यभटः स्वस्य जीवनस्य विषये अत्यन्तं स्वल्पम् एव कथयति । आर्यभटीयग्रन्थस्य गणितपादस्य आदौ मङ्गलाचरणश्लोके आर्यभटः कथयति –

**ब्रह्मकुशशिबुधभृगुरविकुजगुरुकोणभगणान् नमस्कृत्य ।**
**आर्यभटस्त्विह निगदति कुसुमपुरेऽभ्यर्चितं ज्ञानम् ॥** *आर्यभटीयम्, गणितपादः श्लो. १*

अर्थात्, आर्यभटः सृष्टिकर्तारं ब्रह्माणं, भूमिं, चन्द्रं, बुधं, (भृगुपुत्रं) शुक्रं, रविं, मङ्गलं, गुरुं, शनिं नक्षत्रगणान् च नत्वा पाटलीपुत्रे यत् प्रशस्तं ज्ञानम् आसीत् तत् कथयति ।

अस्मिन् पद्ये आर्यभटः "कुसुमपुरे" इति स्थानवाचकं पदं प्रयुङ्क्ते । भाष्यकारः (प्रथमः) भास्कराचार्यः एतद् उद्दिश्य स्वस्य आर्यभटीयभाष्ये कथयति "कुसुमपुरं पाटलीपुत्रम्" इति । आर्यभटीयग्रन्थस्य रचनास्थानं पाटलीपुत्रम् आसीत् इति विदुषां मतम् । आर्यभटस्य जीवनम् अपि पाटलीपुत्रे विश्वविद्यालये कुलपतिरूपेण आसीत् इति मन्यते । अतः सः क्वचित् "कुलपः" इति पदेन सम्बुध्यते [ **भूगोलवित् कुलप आर्यभटाभिधानः ॥ ]"** - परमेश्वरस्य भट्टदीपिका इति आर्यभटीयभाष्ये] । आर्यभटस्य जन्मस्थानविषये इदमित्थम् इति वक्तुं पर्याप्तानि प्रमाणानि न उपलभ्यन्ते । अतः तस्य जन्मस्थानस्य विषये विदुषाम् अनेकानि मतानि सन्ति ।

आर्यभटः आ बाल्यात् एव महान् पण्डितः ज्योतिषज्ञः च आसीत् । तस्य त्रयोविंशतितमे वयसि एव सः "आर्यभटीयम्" रचितवान् । सः स्वयं कथयति -

**षष्ट्यब्दानां षष्टिर्यदा व्यतीतास्त्रयश्च युगपादाः ।**
**त्र्यधिका विंशतिरब्दास्तदेह मम जन्मनोऽतीताः॥** *आर्यभटीयम्, कालक्रियापादः, श्लो. १०*

अर्थात्, कलियुगस्य आरम्भात् यदा ३,६०० वर्षाणि अतीतानि, अस्य कलियुगस्य त्रयः पादाः च व्यतीताः, तदा अहम् (आर्यभटः) २३-वर्षीयः इति ।

श्लोके कथित-गणनायाः अनुगुणं सामान्य-युगमानस्य ४९९-तमे वर्षे आर्यभटः २३-वर्षीयः आसीत् । अनेन, अस्य जन्म सामान्य-युगमानस्य ४७६-तमे संवत्सरे आसीत् इति सिद्ध्यति ।

**स्वायम्भुवसिद्धान्तस्य उज्जीवकः**

ज्योतिषशास्त्रस्य परम्परायां प्रधानतया पञ्च सिद्धान्ताः कथ्यन्ते -

१. पौलीशसिद्धान्तः
२. रोमकसिद्धान्तः
३. वासिष्ठसिद्धान्तः
४. सौरसिद्धान्तः (सूर्यसिद्धान्तः)
५. पैतामहसिद्धान्तः (स्वायम्भुवसिद्धान्तः)

च इति । एतेषु सिद्धान्तेषु ग्रहचाराणां विषये बहु कथ्यते । ग्रहाणां गतिः कीदृशी स्यात्, तेषाम् उदयस्य अस्तमनस्य च कालः कः स्यात्, सूर्यग्रहणं चन्द्रग्रहणं च कदा भवेत् इत्यादयः अनेके विषयाः तत्र उच्यन्ते । परन्तु प्रत्येकं सिद्धान्ते अपि कथितेषु एतेषु विषयेषु काश्चन विसङ्गतयः दृश्यन्ते स्म । आर्यभटः एताः विसङ्गतीः निवारयन् स्वायम्भुव-सिद्धान्तम् उज्जीवितवान् । अतः केरलीयः ज्योतिषज्ञः परमेश्वरः "भट्टदीपिका" इति नाम्ना रचिते स्वस्य आर्यभटीयभाष्ये कथयति -

**"सिद्धान्त-पञ्चक-विधावपि दृग्विरुद्धमौढ्योपराग-मुखखेचर-चारक्लृप्तौ ।**
**सूर्यः स्वयं कुसुमपुर्यभवत्कलौ तु भूगोलवित्कुलप आर्यभटाभिधानः ॥"** *परमेश्वरस्य भट्टदीपिका (आर्यभटीयभाष्यम्)*

अर्थात्, 'आर्यभटस्य काले ये पञ्च सिद्धान्ताः आसन् तेभ्यः ग्रहचाराणां गणनायाः अनेके परिणामाः दृग्विरुद्धाः दृश्यन्ते स्म । अतः कुसुमपुरे सूर्यदेवः स्वयं भूगोलस्य ज्ञानी कुलपतिः आर्यभटः इति रूपेण अवतारं कृतवान्' इति ।

**तप:स्वाध्यायनिरतः**

आर्यभटः ब्रह्मदेवम् उद्दिश्य महत् तपः अकरोत् इति मन्यते । अतः भाष्यकारः (प्रथमः) भास्कराचार्यः कथयति -

**आचार्यार्यभटस्तपोभिरमलैराराध्य पद्मोद्भवं**
**यल्लेभे ग्रहचारसारविषयं बीजं महार्घं स्फुटम् ।**
**तस्यातीन्द्रियगोचरार्थनिपुणस्पष्टोरुसद्वस्तुनो**
**व्याख्यानं गुरुपादलब्धमधुना किञ्चिन्मया लिख्यते ॥** *भास्करस्य आर्यभटीयभाष्यम्, गणितपादः*

अर्थात्, 'आचार्यः आर्यभटः निर्मलेन तपसा ब्रह्मदेवम् आराध्य ग्रहचार-विषयकम् अमूल्यं ज्ञानं स्फुटतया प्राप्तवान् । तथाभूतम् अतीन्द्रियविषयकं ज्ञानम् इतोऽपि स्पष्टतया प्रतिपादयितुम् एव अहं (भास्कराचार्यः) अस्य विषये किञ्चित् व्याख्यानं करोमि' इति ।

आर्यभटः स्वस्य ज्ञानप्राप्तेः विषये स्वयमपि कथयति । आर्यभटीयग्रन्थम् उपसंहरन् सः कथयति -

**सदसज्ज्ञान-समुद्रात् समुद्धृतं ब्रह्मणः प्रसादेन ।**
**सज्ज्ञानोत्तम-रत्नं मया निमग्नं स्व-मति-नावा ॥** *आर्यभटीयम् ४.४९*

अर्थात्, 'शुद्ध-अशुद्धज्ञानमयात् ज्योतिष-ज्ञान-सागरात्, अहम् (आर्यभटः) ब्रह्मदेवस्य प्रसादेन स्वस्य बुद्धिनामिकया नौकया तीर्त्वा केवलं शुद्धज्ञानरूपं रत्नं प्राप्तवान्' इति ।

सूर्यदेवयज्वा इति कश्चन द्वादशशतकीयः महान् ज्योतिषज्ञः अपि स्वस्य भाष्ये एतं विचारं कथयति । तस्य वचनानुसारम् आर्यभटः कालक्रिया, गोलः, गणितम् इत्येतेषु विषयेषु प्रवर्तमानान् विसंवादान् अवलोक्य तान् परिहर्तुम् ऐच्छत् । तन्निमित्तं सः ज्योतिष-शास्त्रकर्तारं ब्रह्माणम् उद्दिश्य विमलं तपः आचरितवान् । तस्य तपसा प्रसन्नः ब्रह्मदेवः आर्यभटाय रहस्यमयम् अतीन्द्रियभूतं ज्ञानम् उपदिष्टवान् ।

**"आचार्यार्यभटः पुरातनानि कालक्रिया-गोल-लौकिकगणित-प्रतिपादकानि शास्त्राणि कालदैर्घ्यायत्तसम्प्रदायविच्छेद-ग्रन्थवैकल्यादिजनितेन दृग्गणितविसंवादेनाकिञ्चित्कराण्यालोच्य समदृग्गणितं ज्योतिश्शास्त्रं चिकीर्षु तादृशज्योतिर्ज्ञानबीजलाभाय ज्योतिश्चक्रग्रहादेरादिवक्तारं भगवन्तं स्वयम्भुवम् अमलैस्तपोभिराराधयामास । ततः प्रसन्नो भगवांस्तस्मै तादृशमतीन्द्रियम् अतिरहस्यभूतं कालक्रिया-गोल-ज्ञानबीजमुपदिदेश ।"** *सूर्यदेवयज्वनः आर्यभटीयभाष्यम्, गीतिकापादः*

**आर्यभटीयस्य वैलक्षण्यम्**

आर्यभटः तु २३-वयसि एव 'आर्यभटीयम्' नाम सुविख्यातम् अतिमहत्त्वभूतं ग्रन्थं रचितवान् । अस्मिन् ग्रन्थे कथिताः विषयाः महत्त्वभूताः, शिष्टैः पूजिताः इति ज्ञायते । गणितपादस्य आदौ एव "कुसुमपुरेऽभ्यर्चितं ज्ञानम्" इति आर्यभटेन यत् कथितं तदेव अस्य महत्तां द्योतयति । एतं विषयं सूचयन् भाष्यकारः भास्कराचार्यः कथयति -

**"अयं किल स्वायम्भुवसिद्धान्तः कुसुमपुरनिवासिभिः कृतिभिः पूजितः सत्स्वपि पौलिशरोमकवासिष्ठसौर्येषु, तेनाह कुसुमपुरेऽभ्यर्चितं ज्ञानमिति ।"** *भास्करस्य आर्यभटीयभाष्यम्*

अर्थात्, 'यद्यपि पौलीश-रोमक-वासिष्ठ-सौर्य-सिद्धान्ताः प्रचलिताः आसन्, तथापि आर्यभटेन प्रतिपादितः स्वायम्भुवसिद्धान्तः एव कुसुमपुरनिवासिभिः मानितः आसीत्' इति ।

अस्य ग्रन्थस्य अनेकानि वैशिष्ट्यानि सन्ति । ब्रह्मदेवस्य प्रसादात् प्राप्तस्य अस्य ज्ञानस्य विषये आर्यभटस्य महान् एव अभिमानः आसीत् । अतः सः अस्य ग्रन्थस्य विषयान् प्रशंसन् कथयति -

**आर्यभटीयं नाम्ना पूर्वं स्वायम्भुवं सदा नित्यम् ।**
**सुकृतायुषोः प्रणाशं कुरुते प्रतिकञ्चुकं योऽस्य ॥"** *आर्यभटीयम्, गोलपादः ५०*

अर्थात्, 'आर्यभटीयाख्यः अयं ग्रन्थः स्वायम्भुवसिद्धान्तस्य प्रतिपादकः चिरं तिष्ठेत् । यः अस्य तिरस्कारं करोति तस्य पुण्यम् आयुः च विनश्यति' इति ।

नीलकण्ठसोमयज्वा इति प्रसिद्धः कश्चन केरलीयः ज्योतिषज्ञः । तेनापि आर्यभटीयग्रन्थस्य भाष्यं विहितम् आसीत् । तदीये भाष्ये सः कथयति -

**"आचार्यार्यभटीयसूत्रितमहागूढोक्तिमुक्तावली-**
**मालालङ्कृतयो जयन्ति विमला वाचो यदीयाः शुभाः ।**
**सूक्ष्मा यत्प्रतिभा च गूढगणितं निश्शेषकालक्रियां**
**भूगोलं ग्रहवास्तवञ्च तदिदं विश्वं स्फुटं पश्यति ॥"** ***नीलकण्ठसोमयज्वनः आर्यभटीयभाष्यम्, पु.७***

अर्थात्, 'आचार्येण आर्यभटेन सूत्रमालावत् कथिताः गूढविषयाः मङ्गलमयाः शुद्धाः च सन्तः विजयन्ते । अनेन सूक्ष्मां प्रतिभां प्राप्य गणित-कालग्रिया-गोलविषयैः इदं विश्वं स्फुटं दृश्यते' इति ।

ऐतिहासिकदृष्ट्या अपि अस्य ग्रन्थस्य अद्वितीयं स्थानम् अस्ति । विश्वे उपलभ्यमानेषु ग्रन्थेषु प्रथमः गणिताध्याययुतः ज्योतिषग्रन्थः आर्यभटीयम् एव । एतस्मात् पूर्वे ये नैके ज्योतिषीयाः ग्रन्थाः रचिताः आसन् तेषु गणितस्य पार्थक्येन अध्यायस्य कल्पना न कृता आसीत् । आर्यभटेन एव तत् प्रथमवारं कृतम् । एतस्मात् परं ब्रह्मगुप्तादयः ज्योतिषज्ञाः अपि एतं क्रमं पालितवन्तः । कालान्तरेण गणितस्य एव पृथक् ग्रन्थाः रचिताः । ततोऽप्यग्रे व्यक्तगणितस्य, बीजगणितस्य च पृथक् पृथक् ग्रन्थाः रचिताः आसन् ।

**आर्यभटीयस्य ग्रन्थस्वरूपम्**

आर्यभटीयग्रन्थे चत्वारः पादाः सन्ति - गीतिकापादः, गणितपादः, कालक्रियापादः, गोलपादः च इति । ग्रन्थेऽस्मिन् आहत्य १२१ श्लोकाः सन्ति । एतेषु केचन उल्लेखनीयाः अंशाः सन्ति - आर्यभटीयसङ्ख्या, परिधिव्यासानुपातः, वृत्तज्यार्धमानानि, कुट्टकम्, भू-परिभ्रमणम्, कालगणना, ग्रहाणां गतिः इत्यादयः ।

आर्यभटीयस्य गणितपादे ३३ श्लोकाः सन्ति । तत्र ३८ विषयाः प्रतिपादिताः सन्ति । यथा, सङ्ख्यास्थानानि, वर्गः, घनः वर्गमूलं, घनमूलं, त्रिभुजवृत्तादीनां क्षेत्रफलम् इत्यादयः । तेषु पाटीगणितम्, बीजगणितं, क्षेत्रगणितं, ज्योत्पत्तिः (त्रिकोणमितिः) इत्येते भागाः अन्तर्भवन्ति । एते -

१. मङ्गलाचरणम्
२. सङ्ख्यास्थाननिरूपणम्
३. वर्गः
४. घनः
५. वर्गमूलम्
६. घनमूलम्
७. त्रिभुजक्षेत्रफलम्
८. षडश्रिघनफलम्
९. वृत्तस्य क्षेत्रफलम्
१०. गोलघनफलम्
११. समलम्बचतुर्भुजस्य स्वपातरेखे क्षेत्रफलं च
१२. सर्वक्षेत्राणां फलम्
१३. व्यासार्धतुल्यज्या
१४. वृत्ते परिधिव्यास-सम्बन्धः
१५. छेद्यकविधिना-ज्यानयनम्
१६. प्रकारान्तरेण खण्डज्या

१७. वृत्तादिसिद्धिः समभूरध-ऊर्ध्वकरणं च
१८. स्ववृत्तविष्कम्भार्धम्
१९. प्रदीपच्छायाकर्म
२०. शङ्कुच्छायाद्वयेन दीपच्छायाप्रसारज्ञानम्
२१. भुजाकोटिकर्णन्यायः
२२. वृत्ते अर्धज्याशरयोः सम्बन्धः
२३. वृत्तावगाहशरज्ञानम्
२४. श्रेढीगणितम्
२५. गच्छज्ञानम्
२६. एकोत्तराद्युपचितिघनः
२७. वर्गचितिघनः-घनचितिघनश्च
२८. प्रकारान्तरेण राशिद्वयसंवर्गज्ञानम्
२९. गुणकारयोः आनयनम्
३०. मूलफलज्ञानम्
३१. त्रैराशिकम्
३२. भिन्नानां भाजनम्
३३. कलासवर्णनम्
३४. विपरीतकर्म
३५. अनेकवर्णसीकरणविशेषः
३६. एकवर्णसमीकरणणम्
३७. योगकालज्ञानम्
३८. कुट्टाकारः

**आर्यभटीयस्य भाष्यकाराः**

आर्यभटीयस्य प्रामुख्यस्य अपरं निदर्शनम् एतद् अस्ति यत् अस्य ग्रन्थस्य अनेकैः ज्योतिषज्ञैः अनेकासु भाषासु भाष्याणि रचितानि। केचन विद्वांसः ये आर्यभटीयभाष्यं रचितवन्तः तेषां नामानि अधः प्रदर्श्यन्ते -

१. भास्कराचार्यः (प्रथमः)
२. प्रभाकरः
३. सोमेश्वरः
४. सूर्यदेव-यज्वा
५. परमेश्वरः
६. यल्लय्यः – सूर्यदेवकृतभाष्यस्य टिप्पणीकारः
७. नीलकण्ठ-सोमयाजी
८. रघुनाथराजः
९. माधवः
१०. भूतिविष्णुः
११. घटीगोपः
१२. कोदण्डरामः

१३. विरूपाक्षः (तेलुगु-भाषायाम्)
१४. कृष्णदासः (मलयाल-भाषायाम्)
१५. कृष्णः (मलयाल -भाषायाम्)
१६. घटीगोपः (मलयाल -भाषायाम्)
१७. अज्ञातकर्तृकः (मराठी-भाषायाम्)

**आर्यभटीयस्य प्रभावः**

आर्यभटीयग्रन्थस्य आधारेण अनेके विद्वांसः ज्योतिषग्रन्थान् व्यरचयन् । नवमशतकीयः ज्योतिषज्ञः (प्रथमः) भास्कराचार्यः त्रीन् ग्रन्थान् रचितवान् -

आर्यभटीयभाष्यम् लघुभास्करीयम् महाभास्करीयम्

इति । एतान् ग्रन्थान् सः "आर्यभटकर्मनिबन्धनम्" इति उल्लिखति । अर्थात्, आर्यभटेन प्रतिपादितानां विषयाणाम् एव आधारेण रचिताः इमे ग्रन्थाः इति । केरलीयैः ज्योतिषज्ञैः आर्यभटस्य मतम् अवलम्ब्य अनेके ज्योतिष-ग्रन्थाः रचिताः । 'करणरत्नम्' इत्यस्मिन् ग्रन्थे आर्यभटेन कथितविधिना ग्रन्थकारेण देवेन कथ्यते -

**आर्यभट-शास्त्र-जलधिं मति-नावा दूरमखिलमवगाह्य ।**
**लब्धं मयेदमखिल-ग्रहांशु-जटिलं करणरत्नम् ॥**

अर्थात्, 'आर्यभटीयाख्ये शास्त्र-समुद्रे स्वमति-नौकया अवगाह्य सर्वग्रह-कान्ति-रूपम् इदं करणरत्नं मया प्राप्तम्' इति ।

१. लघुभास्करीयं, महाभास्करीयं च (प्रथमः भास्कराचार्यः)
२. करणरत्नम् (देवः)
३. ग्रहचारनिबन्धनम् (हरिदत्तः)
४. शिष्यधीवृद्धिदः (लल्लाचार्यः)
५. करणप्रकाशः (ब्रह्मदेवः)
६. भटतुल्यः (दामोदरः)
७. करणपद्धतिः (पुदुमन-सोमयाजी)
८. आर्यभटसिद्धान्त-तुल्यकरणम् (वीरसिंहः)

आर्यभटीयग्रन्थस्य ख्यातिः विदेशेषु अपि प्रसृता आसीत् । एषः ग्रन्थः अरब-देशं प्रति नीतः आसीत्, ततः अबुल्-हासन्-अह्वासी इत्यनेन अरबी-भाषायाम् अनूदितः आसीत् ।

**एष उपसंहारः**

आर्यभटस्य जीवनं कृतिं च वीक्ष्य इदं निश्चप्रचं वक्तुं शक्यते यत् आसौ कश्चन प्रातर्वन्दनीयः महापुरुषः एव इति । भास्कराचार्यः तु एनं व्यासाचार्येण तोलयति । यथा भगवान् वेदव्यासः स्वरचनाभिः लोकानाम् उपकारम् अकरोत्, तद्वत् आर्यभटः अपि लोकसङ्ग्रकार्यं कृतवान् इति ।

**अतीन्द्रियार्थावगतेस्तपोभिः परोपकारक्षमकाव्यदृष्टेः ।**
**योऽलङ्कृतेरव्ययमन्वयस्य पराशरस्यानुकृतिं चकार ॥** *आर्यभटीयभाष्यम् १.१*

अर्थात्, 'आर्यभटः स्वतपसा इन्द्रियाणाम् अगोचरान् विषयान् ज्ञात्वा लोकस्य उपकाराय सुशोभितेन काव्यसृष्टिहेतुना पराशरपुत्रः व्यासः इव कार्यम् अकरोत्' इति ।

अतः यावद् अमूनि ज्योतींषि लोकेषु तिष्ठन्ति, तावद् आर्यभटस्य नाम अस्माकं मुखेषु विलसत्येव । उक्तं च भास्कराचार्येण लघुभास्करीये -

**काले महति देशे वा स्फुटार्थं यस्य दर्शनम् ।**
**जयत्यार्यभटः सोऽब्धिप्रान्तप्रोल्लङ्घिसद्यशाः॥** *लघुभास्करीयम् १.२*

अर्थात्, 'यस्य ख्यातिः सागरान् तीर्त्वा दूरदेशान् प्राप्नोत्, यस्य शास्त्रग्रन्थः अधुना अपि ग्रहकालादिविषयकं परिणामं स्फुटं कथयति, सः आर्यभटः विजयते' इति।